ॐ

धियो यो नः प्रचोदयात्

# प्रबोधिनीगुरुकुलम्

# अर्धमण्डलोत्सवः
# समारोपसमारम्भः

**०९ फेब्रवरि २०२०, भानुवासरः**

**स्थानम्–प्रबोधिनीगुरुकुलम्, चित्रकूटम्, हरिहरपुरम्**

**समयः – प्रातः ११.००**

**अध्यक्षता** : **पद्मश्री डा॥ वि. आर्. गौरीशङ्करः**
गौरवाध्यक्षः अर्धमण्डलोत्सवसमितिः,
कार्यनिर्वहणाधिकारी, श्रीशारदापीठम् शृङ्गेरी

**समारोपभाषणम्** : **माननीयः श्री मोहन् भागवत्**
परमपूजनीयसरसङ्घचालकः,
राष्ट्रीयस्वयंसेवकसङ्घः, नागपुरम्, महाराष्ट्रम्

**अभ्यागतः** : **पद्मभूषण श्री डेविड् फ्रालि**
वेदविद्वान्, अमेरिक

प्रातः १०.०० वादने
गुरुकुलस्य छात्रैः **‘गुरुकुलदर्शनम्’** कार्यक्रमः प्रस्तूयते।

सर्वेभ्यः हार्दं स्वागतम्

**हेच्. बि. राजगोपालः**
कार्याध्यक्षः,
अर्धमण्डलोत्सवसमितिः

**डा॥ विजयसङ्केश्वरः**
अध्यक्षः, अर्धमण्डलोत्सवसमितिः
संस्थापकः, वि.आर्.एल् समूहसंस्था
हुब्बळ्ळि

**आचार्याः, छात्राः च**
प्रबोधिनीगुरुकुलम्

**सर्वसदस्याः**
अर्धमण्डलोत्सवस्वागतसमितिः
प्रबोधिनीन्यासः

# गुरुकुलम् – अर्धमण्डलोत्सवः

स्वस्थसमाजस्य निर्मितिम् उद्दिश्य शिक्षणे भारतीयतायाः पुनःप्रतिष्ठापनार्थं प्रबोधिनीगुरुकुलं गतेभ्यः २४ वर्षेभ्यः शङ्कराचार्याणां साधनभूमेः शृङ्गगिरेः अनतिदूरे **हरिहरपुरे** तुङ्गायाः तीरे चित्रकूटपरिसरे अध्यात्माधिष्ठितम् आर्ष–आधुनिकशिक्षणं प्रदीयमानं वर्तते। गुरुकुले शिक्षणं वासः आहारश्च निःशुल्कं प्रदीयते। समाजस्य पालनेनैव वर्धमानमस्ति।

द्वादशवर्षाणां शिक्षणं स्तरद्वये गुरुकुले दीयते। प्रथमतः अधिशीलमिति पञ्चवर्षात्मकं शिक्षणम्। अधिशीले वेदः, विज्ञानं, योगः, कृषिः, कलाकौशलं चेति पञ्चमुखिशिक्षणेन समं शालापठ्यक्रमस्यापि बोधनं भवति। ततः पश्चात् सप्तवर्षाणाम् अधिप्रज्ञशिक्षणम्। अधिप्रज्ञस्तरे विषयमेकमधिकृत्य उन्नताध्ययने अवकाशः अस्ति।

सनातनसंस्कृतौ ४८ सङ्ख्या मण्डलं सूचयति। तस्मात् २४ अर्धमण्डलं भवति। १९९५ तमे वर्षे आरब्धस्य प्रबोधिनीगुरुकुलस्य् २०१९–२०तमोऽयम् अर्धमण्डलवर्षः। तस्मात् वर्षेस्मिन् बहूनि समाजोपयोगीनि कार्याणि, कार्यक्रमाश्च आयोजिताः । योगः कृषिः परिसरजागृतिः इत्येषां विषयाणां संगोष्ठ्यः; शिक्षकाणां साहितीनां मातॄणां युवकानां च समावेशः कृतः। राज्यस्य चितेषु ३६ प्रदेशेषु गुरुकुलपरिचयात्मकं कार्यक्रमम् आयोज्य दशसहस्राधिकजनान् प्राप्तुं वयं यशस्विनः अभवाम।

**९ फेब्रवरि २०२० दिनाङ्के भानुवासरे** प्रबोधिनीगुरुकुलस्य सुन्दरपरिसरे प्रचाल्यमाने **अर्धमण्डलोत्सवसमारोपसमारम्भे** यूयं सकुटुंबाः बन्धुमित्रैः सह आगच्छथ इति सविनयं निवेद्यते।

धन्यवादाः